कात्यायनीयं शौनकीयं च

चरणव्यूहपरिशिष्टम्

अथ कात्यायनकृतं

चरणव्यूहपरिशिष्टम्

ऋग्वेदखण्डः

अथातश्चरणव्यूहं व्याख्यास्यामस्तत्र यदुपगतं चातुर्वेद्यं चत्वारो वेदा विज्ञाता भवन्ति।

तत्र ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति।

तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति, चर्चा श्रावकश्चर्चकः श्रवणीयपारः क्रमपारः क्रमपदः क्रमजटः क्रमदण्डश्चेति।

चतुष्पारायणमेतेषाम्।

शाखाः पञ्चविधा भवन्ति शाकला वाष्कला आश्वलायनाः शाङ्खायना माण्डूकायनाश्चेति, तेषामध्ययनम्—

अध्यायश्च चतुष्षष्टिर्मण्डलानि दशैव तु।
एकर्च एकवर्गश्च एकश्च नवर्चस्तथा॥

द्वौ वर्गौ तु द्वृचौ ज्ञेयौ त्र्यूनं तृचशतं स्मृतम्।
चतुर्ऋचं समाख्यातं षट्सप्तत्युत्तरं शतम्॥

पञ्चर्चं द्वादशशतान्यष्टाविंशोत्तराणि च।
शतत्रयं षड्ऋचञ्च सप्तपञ्चाशदुत्तरम्॥

सप्तर्चमेकोनत्रिंशदुत्तरं शतमेककम्।
अष्टर्चं पञ्चपञ्चाशद्वर्गाः स्युर्नाधिकोत्तराः॥

वर्गाणां परिसङ्ख्यातं द्वे सहस्रे षडुत्तरे।
ऋचां दश सहस्राणि ऋचां पञ्चशतानि च।
ऋचामशीतिपादश्चैतत्पारायणमुच्यते॥

॥ इति कात्यायनीये चरणव्यूहपरिशिष्टे प्रथमः ऋग्वेदखण्डः॥

यजुर्वेदखण्डः

यजुर्वेदस्य षडशीतिर्भेदा भवन्ति। तत्र चरकानां द्वादशभेदा भवन्ति। चरका आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वारायणीया वार्तान्वतीयाः श्वेताश्वतरा औपमन्यवाः पान्ताण्डनीया मैत्रायणीयाश्चेति। तत्र मैत्रायणीयानां सप्त भेदा भवन्ति, मानवा वाराहा दुन्दुभा-श्छागलेयाः श्यामाः श्यामायनीया हारिद्रवीयाश्चेति। तत्र हारिद्रवीयानां पञ्च भेदा भवन्ति, तत्र हारिद्रवीयाऽऽसुरी गार्गी शार्कराक्ष्याग्रावासवी चेति पञ्चेति हारिद्रवीयसङ्ग्रहः।

तेषामध्ययनमष्टादशयजुःसहस्राण्यधीत्य शाखापारो भवति, तान्येव द्विगुणान्यधीत्य पदपारो भवति, तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति। षडङ्गान्यधीत्य षडङ्गविद् भवति।

तत्र षडङ्गानि भवन्ति—शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।

छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥

तथा प्रतिपदमनुपदं छन्दोभाषा धर्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि।

तथाऽत्र तैत्तिरीयानां द्विभेदा भवन्ति—औखेयाः खाण्डिकेयाश्चेति। तत्र खाण्डिकेयानां पञ्च भेदा भवन्ति। भारद्वाजी आपस्तम्बी बौधायनी सत्याषाढी शाट्यायनी चेति। तेषामध्ययनम्।

काण्डास्तु सप्त विज्ञेयाः प्रश्नाचाधिक्यकाश्चतुः।
चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट्॥

एकपञ्चाशदधिकाः सङ्ख्याः पञ्चाशदुच्यते।
द्विसहस्रञ्चैकशतमष्टानवति चाधिका॥

लक्षैकं तु द्विनवतिसहस्राणि प्रकीर्तितम्।
पदानि नवतिश्चैव तथैवाक्षरमुच्यते॥

लक्षद्वयं त्रिपञ्चाशत् सहस्राणि शताष्टकम्।
अष्टषष्ट्यधिकञ्चैव यजुर्वेदप्रमाणकम्॥

शाखावाक्यान्ययुतानि सहस्राणि नवानि च।
चतुः शतान्यशीतिश्च अष्टौ वाक्यानि गण्यते॥

इति ब्राह्मणम्। एवमेषामध्ययनं प्रवचनीयं सौत्रिकञ्चेति। तत्र कठानां तूपगाश्चतुश्चत्वारिंशत्।

मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते।
यजुर्वेदः स विज्ञेय अन्ये शाखान्तराः स्मृताः॥ इति।

तत्र वाजसनेयिनां पञ्चदशभेदा भवन्ति—जाबाला बौधेयाः काण्वा माध्यन्दिनाः शापेयास्तापायनीयाः कपोलाः पौण्ड्रवत्सा आवटिकाः परमावटिकाः पाराशरा वैनधेया गालवा कात्यायना वैजवापाश्चेति। तेषामध्ययनम्—

द्विसहस्रः शतन्यूनो मन्त्रे वाजसनेयके।
ऋग्गणः परिसङ्ख्यातः शेषमन्यद्यजुः स्मृतम्॥

अष्टौ सहस्राणि शतानि चाष्टावशीतिरक्षराण्यृग्भिर्विभक्तं केवलं सखिलं सशुक्रियं च यत्।

सकलं परिसङ्ख्यातं ब्राह्मणं च चतुर्गुणम् ।

तत्र माध्यन्दिनीयपरिमाणं तु—

कण्डिकास्तु परिज्ञेयाः शतान्येकोनविंशतिः ।
पञ्चसप्तत्यधिकानि वेदे माध्यन्दिनीयके ॥

ब्राह्मणं तु शतपथं काण्डानि च चतुर्दश ।
मन्त्रः पदः क्रमश्चैव चतुर्थः स्याज्जटा तथा ॥

क्रममाला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥

पारस्करं गृह्यसूत्रं कल्पः कात्यायनीयकः ।
षडङ्गोपाङ्गयुग्वेदो यथोक्तफलदो भवेत् ॥

तत्र परिशिष्टानि भवन्ति—यूपलक्षणं, छागलक्षणं, प्रतिज्ञाऽनुवाकसङ्ख्या, चरणव्यूहः, श्राद्धकल्पः, शुल्बमृग्यजुषं, पार्षदमिष्टकापूरणं, प्रवराध्यायो, मूल्याध्याय, उञ्छशास्त्रं, निगमा, यज्ञपार्श्वे, हौत्रिकं, प्रसवोत्थानं, कूर्मलक्षणमित्यष्टादश परिसिष्टानि भवन्ति।

अनुक्रमः पदज्योतिर्यजुषां च विधानकम् ।
कर्मप्रदीपिका चैव स्वराणां व्यञ्जनं तथा ॥

मन्त्रभ्रान्तिहरश्चैव शिक्षाणां पञ्चकं तथा ।
शेषमध्ययनमुच्छिन्नं कल्पसूत्रेषु पठ्यते ॥

अङ्गब्राह्मणकल्पानां साम्नां च यजुषामृचाम् ।
षण्णां यः प्रविभागज्ञः सोऽध्वर्युः कृत्स्न उच्यते ॥

॥ इति कात्यायनीये चरणव्यूहपरिशिष्टे द्वितीयो यजुर्वेदखण्डः ॥

सामवेदखण्डः

सामवेदः किल सहस्रभेद आसीत्, तेष्वनध्यायेष्वधीयानाः शक्रेणाभिहताः, शेषान् प्रवक्ष्यामि । तत्र राणायनीयानां सप्त भेदा भवन्ति—राणायनीया शाट्यमुग्र्याः कालोपा महाकालोपा लाङ्गलायनाः शार्दूलाः कौथुमाश्चेति। तत्र कौथुमानां षड् भेदा भवन्ति—आसुरायणा वातायनाः पतञ्जलयो वेदभृतः प्राचीनयोग्याः जैमिनेयाश्चेति।

तेषामध्ययनम्—चतुर्दशोत्तरशतमाग्नेयं, द्विपञ्चाशदधिकत्रिशतमैन्द्रं, शतमेकोनविंशतिकं च पावमानं, पञ्चपञ्चाशदारण्यकं, दश महानाम्न्यः, पञ्चविंशत्यधिकं द्वादशशतमुत्तरार्चिकमित्येषा छन्दोगानामार्चिकसंहिता।

द्विसहस्रं द्वाविंशतिकं च चतुर्धा सामानि यानि गायन्ति सामगाः। तानि सबालखिल्यानि सारण्यकानि ससुपर्णप्रेङ्खानि।

पुनरष्टौ ब्राह्मणानि। तान्यधीत्य चण्डात् प्रचण्डतरो भवति।

केचित् पुनर्ऋक्तन्त्रं सामतन्त्रं संज्ञाधातुलक्षणमिति विधीयन्ते। एतानि परिशिष्टान्यधीत्य शिष्टविशिष्टो भवति। इत्येतत् सामगानामध्ययनं स्मृतम्।

॥ इति कात्यायनीये चरणव्यूहपरिशिष्टे तृतीयः सामवेदखण्डः ॥

अथर्ववेदखण्डः

अथर्ववेदस्य नव भेदा भवन्ति—पिप्पलादाः शौनकाः मोदाः शौक्वायनाः जाजलाः ब्रह्मबलाः कुमुदादिनो वेदस्पर्शाश्चारणविद्याश्चेति। तेषामध्ययनम्—

द्वादशैव सहस्राणि मन्त्राणामाभिचारिकम्।
ब्रह्मत्वं सरहस्यं स्यादथर्ववेदविस्तरम् ॥

तेषां पञ्च कल्पा भवन्ति—नक्षत्रकल्पः शान्तिकल्पो वितानकल्पः संहिताकल्प आङ्गिरस-कल्पश्चेति। कल्पे कल्पे परिशिष्टानि भवन्ति।

सर्वेषामेव वेदानामुपवेदा भवन्ति—ऋग्वेदस्यायुर्वेद उपवेदो, यजुर्वेदस्य धनुर्वेद उपवेदः, सामवेदस्य गान्धर्ववेद उपवेदोऽथर्ववेदस्य स्थापत्यवेद उपवेद, इत्याह भगवान् कात्यायनः।

॥ इति कात्यायनीये चरणव्यूहपरिशिष्टे चतुर्थोऽथर्ववेदखण्डः ॥

चतुर्वेदफलश्रुतिखण्डः

य इमे चत्वारो वेदास्तेषामेकैकस्य कीदृक् रुपं वर्णः प्रमा विधेत्युच्यते—ऋग्वेदः पद्मपत्राक्षः प्रबलजठरः सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः श्लक्ष्णो गोक्षीरवर्णः श्वेतकीर्तिः, प्रमाणे वितस्तिपञ्चकः।

यजुर्वेदः पिङ्गाक्षः कृशमध्यः स्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा, प्रादेशषट्कमात्रो दीर्घत्वेन।

सामवेदो नित्यं स्रग्वी सुप्रीतः शुचिवासाः क्षमी दान्तो बृहच्छरीरः कातरनयनः काञ्चननयनो वा आदित्यवर्णो वर्णेन, षडरत्निमात्रः।

अथर्ववेदस्तीक्ष्णतरः प्रचण्डः कामरूपी विशालाक्षो विश्वात्मा विश्वसृट् क्षुद्रकर्मा विश्वसाक्षी महाप्राज्ञो नीलोत्पलवर्णो वर्णेन पञ्चारत्निमात्रः।

ऋग्वेदस्यात्रेयगोत्रं सोमो दैवतं गायत्रीछन्दः। यजुर्वेदस्य काश्यपगोत्रमिन्द्रो दैवतं त्रिष्टुप्छन्दः। सामवेदस्य भारद्वाजगोत्रं रुद्रो दैवतं जगतीछन्दः। अथर्ववेदस्य वैखानसगोत्रं ब्रह्मदैवतमनुष्टुप्छन्दः।

य इदं वेदानां नाम रूपं गोत्रं दैवतं छन्दः प्रमाणं वर्णं वर्णयति, सोऽविद्वान् विद्वान् भवति, जन्मजन्मनि वेदपारगो भवति, अव्रतो व्रतो भवति, अब्रह्मचारी ब्रह्मचारी भवति, जातिस्मरो जायते।

य इदं चरणव्यूहं गुर्विणीं श्रावयेत् स्त्रियम् ।
पुमांसं जनयेत् पुत्रमृषिभिर्वेदपारगम् ॥
य इदं चरणव्यूहं श्राद्धकाले पठेद् द्विजः ।
अक्षय्यं तत् भवेच्छ्राद्धं पितृँश्चैवोपतिष्ठते ॥

य इदं चरणव्यूहं पठेत् स पङ्क्तिपावनः ।
तारयेदात्मनो वंश्यान् सप्त पूर्वांस्तथाऽपरान् ॥

य इदं चरणव्यूहं पठेत् पर्वसु पर्वसु ।
विधूतपाप्मा स स्वर्गी ब्रह्मभूयाय कल्पते ॥

इत्याह भगवान् कात्यायनो भगवान् कात्यायनः ।

॥ इति कात्यायनीये चरणव्यूहपरिशिष्टे पञ्चमश्चतुर्वेदफलश्रुतिखण्डः ॥

॥ इति कात्यायनीयं चरणव्यूहपरिशिष्टं समाप्तम् ॥

अथ शौनकोक्तं

चरणव्यूहपरिशिष्टम्

अथ ऋग्वेदखण्डः

अथातश्चरणव्यूहं व्याख्यास्यामः ॥ १ ॥

तत्र यदुक्तं चातुर्विद्यं चत्वारो वेदा विज्ञाता भवन्ति ॥ २ ॥

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति ॥ ३ ॥

तत्र ऋग्वेदस्याष्टौ स्थानानि भवन्ति ॥ ४ ॥

चर्च्चा, श्रावकः, चर्च्चकः श्रवणीयपारः ॥ ५ ॥

क्रमपारः, क्रमपदः, क्रमजटः, क्रमदण्डश्चेति चतुष्पारायणम् ॥ ६ ॥

एतेषां शाखाः पञ्च विधा भवन्ति ॥ ७ ॥

आश्वलायनी, शाङ्खायनी, शाकला, वाष्कला, माण्डूकायनाश्चेति ॥ ८ ॥

तेषामध्ययनम् ॥ ९ ॥

अध्यायाश्च चतुःषष्टिर्मण्डलानि दशैव तु ॥ १० ॥

वर्गाणां परिसङ्ख्यातं द्वे सहस्रे षडुत्तरे ।
सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पितम् ॥

दशसप्तसु पठ्यन्ते सङ्ख्यातं वै पदक्रमम् ।

एकशतसहस्रं वा द्वित्रिपञ्चाशत्सहस्रार्द्धमेतानि चतुर्दशवासिष्ठानामितरेषां पञ्चाशीतिः क्रमकाले तु वेष्टव्यं चतुस्त्रिंशत्सहस्राणि तु द्विखण्डानां सहस्राणां द्वात्रिंशत् षोडशोत्तरा । चत्वारिंशत्सहस्राणि द्वात्रिंशतञ्चाक्षरसहस्राणि

ऋचां दश सहस्राणि ऋचां पञ्च शतानि च ।
ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥

एकर्च एकवर्गश्च एकश्च नवकस्तथा ।
द्वौ वर्गौ तु द्वृचौ ऋक्त्रयश्च शतं स्मृतम् ॥

चतुर्ऋचां पञ्च सप्तमधिकं च शतं तथा ।
पञ्चर्चञ्च द्विशद्युक्तं सहस्रं रुद्रंयुतम् ॥

पञ्चचत्वार्यधिकं तु षडृचां च शतत्रयम् ।
सप्तर्चस्य शतं ज्ञेयं विंशतिश्चाधिका स्मृता ॥

अष्टऋचां तु पञ्चाशत्पञ्चाधिकं तथैव च ।
दशाधिकद्विसहस्र पञ्चशाखासु निश्चिताः ॥

वर्गाः संज्ञानसूक्तस्य चत्वासरश्चात्र मीलिताः ।
एवं पारायणे प्रोक्ता ऋचा सङ्ख्येन न्यूनतः ॥ ११ ॥

॥ इति शौनकीये चरणव्यूहपरिशिष्टे प्रथमः ऋग्वेदखण्डः समाप्तः ॥

अथ यजुर्वेदखण्डः

यजुर्वेदस्य षडशीतिर्भेदा भवन्ति। तत्र चरका नाम द्वादश भेदा भवन्ति, चरका आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वारायणीया वार्त्तान्तवेया श्वेताश्वतरा औपमन्यवः पाताण्डनीया मैत्रायणीयाश्चेति । तत्र मैत्रायणीया नाम षड्भेदा भवन्ति, मानवा वाराहा दुन्दुभाश्छागलेया हारिद्रवेया श्यामायनीयाश्चेति। तेषामध्ययनम्।

द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
ऋग्गणः परिसङ्ख्यातं ततोऽन्यानि यजूंषि च ॥

कश्च पादमेतत्प्रमाणं यजुषां हि केवलं सवालखिल्यं सशुक्रियं ब्राह्मणं च चतुर्गुणं तत्र तैत्तिरीयका नाम द्विभेदा भवन्त्यौखेयाः खाण्डिकेयाश्चेति। तत्र खाण्डिकेया नाम पञ्चभेदा भवन्ति, कालेता शाट्यायनी हैरण्यकेशी भारद्वाज्यापस्तम्बी चेति । तेषामध्ययनमष्टादशयजुःसहस्राण्यधीत्य शाखापारो भवति, तान्येव द्विगुणान्यधीत्य पदपारो भवति, तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति, षडङ्गान्यधीत्य षडङ्गविद्भवति।

त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह ।
यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः ॥

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि।

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

तथा प्रतिपदमनुपदं छन्दो भाषाधर्मो मीमांसान्यायस्तर्क इत्युपाङ्गानि। तत्र परिशिष्टानि भवन्ति, यूपलक्षणं छागलक्षणं प्रतिज्ञाऽनुवाकसङ्ख्याचरणव्यूहश्राद्धकल्पशुल्बकानि पार्षदमृग्यजूंषीष्टकापूरणं प्रवराध्यायोक्थशास्त्रक्रतुसङ्ख्या निगमा यज्ञपार्श्वहौत्रकं प्रसवोत्थानं कूर्मलक्षणमित्यष्टादश परिशिष्टानि भवन्ति । तत्र कठानां योगा येन विशेषस्तत्र प्राच्योदीच्यनैर्ऋत्यवाजसनेया नाम पञ्चदश भेदा भवन्ति, जाबाला बौद्धायनाः काण्वा माध्यन्दिनेयाः शाफेयास्तापनीयाः कपोलाः पौण्डरवत्सा आवटिकाः परमावटिकाः पाराशरा वैणेया वैधेया अद्धा बौधेयाश्चेति। तेषामध्ययनं सौक्तिकं प्रवचनीयाश्चेति।

मन्त्रब्राह्मणकल्पानामङ्गानां यजुषामृचाम् ।
षण्णां यः प्रविभागज्ञः सोऽध्वर्युः कृत्स्नमुच्यते ॥ १ ॥

॥ इति शौनकीये चरणव्यूहपरिशिष्टे द्वितीयः यजुर्वेदखण्डः समाप्तः ॥

अथ सामवेदखण्डः

सामवेदस्य किल सहस्रभेदा आसीदनध्यायेष्वधीयानास्ते शतक्रतुवज्रेणाभिहता प्रनष्टाः। शेषान् प्रवक्ष्यामि—असुरायणीया वासुरायणीया वार्तान्तरेयाः प्राञ्जलऋग्वैनविधा प्राचीनयोग्याः राणायनीयाश्चेति। राणायनीया नाम नव भेदा भवन्ति—राणायनीयाः शाट्यायनीयाः सात्यमुद्गलाः खल्वला महाखल्वला लाङ्गलाः कौथुमा गौतमा जैमिनीयाश्चेति। तेषामध्ययनमशीतिशतमाग्नेयं पावमानं चतुः शतमैन्द्रं तु षड्विंशतिर्यानि गायन्ति सामगास्तान्यधीत्य चण्डात्प्रचण्डतरो भवति शिष्टान्यधीत्य शिष्टाऽऽविंशतिको भवति। तत्र केचित्पुनर्ऋक्तन्त्रं सामतन्त्रं सञ्ज्ञाधातुलक्षणमिति-विधीयन्ते।

अष्टौ सामसहस्राणि सामानि च चतुर्दश ।
अष्टौ शतानि नवतिदशतिर्वालखिल्यकम् ॥
सरहस्यं ससुपर्णं प्रेक्ष्यस्तत्र वालखिल्याः ।
सारण्यकानि सौर्य्याणि ह्येतत्सामगणं स्मृतम् ॥ १ ॥

॥ इति शौनकीये चरणव्यूहपरिशिष्टे तृतीयः सामवेदखण्डः समाप्तः ॥

अथ अथर्ववेदखण्डः

अथर्ववेदस्य नव भेदा भवन्ति। पैप्पला शौनका दान्ता प्रदान्ता औता जाबाला ब्रह्मपलाशा कुनखीवेददर्शी चारणविद्याश्चेति। द्वादशैव सहस्राणि पञ्चकल्पानि भवन्ति। कल्पे कल्पे पञ्च-शतानि भवन्ति, नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः संहिताकल्पः शान्तिकल्पश्चेति।

तत्र वेदानामुपवेदाश्चत्वारो भवन्त्यृग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेद उपवेदः सामवेदस्य गान्धर्ववेदोऽथर्ववेदस्यार्थशास्त्रं चेत्याह भगवान्व्यासः स्कन्दो वा।

य इमे वेदाश्चत्वारास्तेषामेकैकस्य किदृशं रूपं वर्णविधोच्यते ऋग्वेदः पद्मपत्राक्षः सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः श्वेतवर्णो वर्णेन कीर्त्तितं प्रमाणं तावत्तिष्ठन्वितस्तीः पञ्च, यजुर्वेदः पिङ्गाक्षः कृशमध्यस्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा प्रादेशमात्रः षड्दीर्घत्वेन, सामवेदो नित्यं स्रग्वी सुप्रयतः शुचिवासाः शमी दान्तो बृहच्छरीरः शमीदण्डी कातरनयनः आदित्यवर्णो वर्णेन नवारत्निमात्रोऽथर्ववेदस्तीक्ष्णः प्रचण्डः कामरूपी विश्वकर्त्ता क्षुद्रकर्मा स्वशाखाध्यायी प्राज्ञश्च महानीलोत्पलवर्णो वर्णेन दशारत्निमात्र ऋग्वेदस्यात्रेयसगोत्रं सोमदैवत्यं गायत्रीछन्दो, यजुर्वेदस्य काश्यपसगोत्रमिन्द्रदैवत्यं त्रिष्टुप्छन्दः, सामवेदस्य भारद्वाजसगोत्रं रुद्रदैवत्यं जगतीछन्दोऽथर्ववेदस्य वैतानसगोत्रं ब्रह्मदैवत्यमनुष्टुप्छन्दः ॥ १ ॥

॥ इति शौनकीये चरणव्यूहपरिशिष्टे चतुर्थोऽथर्ववेदखण्डः समाप्तः ॥

अथ फलस्तुतिखण्डः

य इदं वेदानां नामरूपगोत्रं प्रमाणं छन्दोदैवतं वर्णं वर्णयति, अविद्यो लभते विद्यां जातिस्मरोऽथ जायते, जन्मजन्म वेदपारगो भवत्यव्रती व्रती भवत्यब्रह्मचारी ब्रह्मचारी भवति नमः शौनकाय नमः शौनकाय ।

य इदं चरणव्यूहं गर्भिणीं श्रावयेत्स्त्रियम् ।
पुमांसं जायते पुत्रमृषिभिर्वेदपारगम् ॥

य इदं चरणव्यूहं श्राद्धकाले पठेद्द्विजः ।
अक्षय्यं तद्भवेच्छ्राद्धं पितॄँश्चैवोपतिष्ठते ॥

य इदं चरणव्यूहं पठेत्स पङ्क्तिपावनः ।
तारयेत्प्रभृतीन्पुत्रान्पुरुषान्सप्तसप्त च ॥

य इदं चरणव्यूहं पठेत्पर्वसु पर्वसु ।
विधूतपाप्मा स स्वर्गी ब्रह्मभूयाय गच्छति ॥

रतिर्धृतिश्शिवाश्यामाश्चत्वारो वेदपत्निकाः ।
ज्ञातव्या यज्ञकालेषु ईशानादि व्यवस्थिताः ॥

लक्षं तु चतुरो वेदा लक्षं भारतमेव च ।
लक्षं व्याकरणं प्रोक्तं चतुर्ल्लक्षं तु ज्यौतिषं चतुर्ल्लक्षं तु ज्यौतिषम् ॥ १ ॥

॥ इति शौनकीये चरणव्यूहपरिशिष्टे पञ्चमः फलश्रुतिखण्डः समाप्तः ॥

॥ समाप्तोऽयं ग्रन्थः ॥

॥ शुभमस्तु ॥